MINOR WORKS OF
ŚRI KṚṢṆĀNANDA SARASVATĪ

EDITED WITH INTRODUCTION

BY

P. V. VARADARAJA SARMA, M. A.,
Librarian,
T. M. S. S. M. Library, Tanjore.

PUBLISHED BY

S. GOPALAN, B. A., B. L.,
Honorary Secretary,
T. M. S. S. M. Library, Tanjore.

A. C. 1959 S'aka 1881

Price Rs. 00.75

Printed at the
Sri Vani Vilas Press, Srirangam.

INTRODUCTION

Sri Krishnānandasarasvatī and his nine minor works have already been referred to in Volume I No. 2 of the Sarasvati Mahal Journal. Besides Siddhānta-Siddhānjanam and these works, this Sanyasin is known to have written Puruṣārtharatnākara, Sivatatvartnakalikā and Anushṭhānapaddhati. It is proposed to publish all the nine minor works in this issue although Manas-sambōdhanam had been published in one of the earlier issue of this Journal, with a view to bring all the minor works in one booklet.

In determining the authorship of these works one has to remember that Krishnānandasarasvatī was known as Krishnānanda as also Bālakrishṇa and had two preceptors known as Rāmabhadra and Vāsudēva, the first being his Vidyāguru and the second Āśramaguru. This accounts for the differences in colophons.

This cadjon leaf bundle containing all the nine works is written in one and the same hand. It is possible that the author himself prepared it or engaged some one as amanuensis and got it prepared under his immediate presence. The writing is legible and settled. It can be hazarded that this manuscript was handled by the author off and on. Here and there there are additions and alterations, sometimes improved readings marked clearly. It is a new feature not found in copies made out of the originals.

That there are two more verses begining with णा in addition to the one printed and one with ह्यौ, while one verse with each letter would have been sufficient to give the Mantra text, is enough to prove that the author composed later ones in preference to the former, leaving the option to the reader to have one of them for his purpose and leave the other. The two additional verses with णा and one with ह्यौ are:—

णावेष तिष्ठति रविक्रियनित्यभावमाह्वाभवन्नभिदधाति परस्य यस्य ।
स्थाणुं तमेव जगतामुदयादिहेतुं श्रीदक्षिणाननमुपैमि शिवं मुमुक्षुः ॥

णागेति वर्णगुणनामपि शिक्षमाणा बाला यदीयमनुवर्णगुणानुकाराः ।
विद्याविशारदपदं परमं भजन्ते तं दक्षिणाननगुरुं भजत त्रिसन्ध्यम् ॥

ह्यः श्वोऽद्य नियमपि चैकरसस्वभावमास्वाद्यमादिगुरुभिर्नियतं शुकाद्यैः ।
आलक्ष्यते किमपि मूलवटद्रुमस्य मूले फलं किमपि मोहहरं मुनीनाम् ॥

The verse given in the text seems to be more appropriate as it corresponds exactly to the Mantravarṇa 'ह्यौं'.

Similarly in verse No. 23 of the Mantrārṇamuktāvali the 4th quarter in the manuscript is

श्रीदक्षिणानमदक्षिणदूरपारम् ।

and improved reading

"स्मेराननं यदि मनः स्मरति स्मरामि" ।

Similar improvement suggested could be seen in verse No. 124 of प्रशमामृतम्.

Of these works first printed is मन्त्रार्णमुक्तावली a garland of 24 verses studded as it were with pearls of Beejākshara of Medhā Dakshiṇāmoorty mantra. The first verse begins with Panchākshara Mantra. To fecilitate Mantrōddhāra first letters of the verses are printed in bold types. By reading the 1st letters of the 24 verses one gets the Moolamantra.

Second is Bhakti Vivardhana Stōtra, an invocation to god Śiva.

मृत्युञ्जयाष्टकम् is the third and contains 10 verses in praise of Kālakāla. All the ślōkas in this are beautiful and betray the poet in this Philosopher.

Fourth is मीनाक्ष्यष्टकम् 8 ślōkas in praise of the consort of Śiva and abounds in Sabdālankāra.

उपदेशदशकम् consisting of 12 ślokas repeating 48 times the famous महावाक्यं of Chāndōgyōupanishad तत्त्वमसि emphasising the identity of the individual soul with the Cosmic is the fifth work.

Sixth सपर्यापर्यायः shows how material worship of personal God should culminate in mental worship of the impersonal and how the former becomes meaningless and farcical at a stage when the individual attains a higher plane of life, shedding imposed limitations on the unlimited infinite. In effect it is an amplification of the wellknown passage of Bṛhadāraṇyakōpaniṣad

यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्केन कं जिघ्रेत्केन कं विजानीयात् ।

अनुभवविंशच्छ्लोकी is the seventh work.

प्रशमामृतम्, Ambrosia of tranquility is the eighth work which is the longest of the nine works describing the blissful nature of a stage when the mind is completely checked from its frivolous tendencies, though not annihilated and made receptive of the blissful nature of the Atman, the dearest and the supreme object of love of all the living creatures. (beings). It consists of 128 verses.

The last one is मनःसंबोधनम् in 21 verses; an appeal to the mind to study its activities past and present and desist from building castles in the air.

Here and there attempts are made to analyse the mind and its nature. What is it called the mind? Every one knows it; in fact nobody knows it. Every one knows it and none knows it is a contradiction. It implies two kinds of knowledge and two types of objects with reference to the knowledge. One is known and the other is known as unknown. The mind is known as unknown. Every thing in the world is known either as known or as unknown. The method of splitting of atom, or a luminary, the height of which has not yet reached the earth may perhaps be not known to one but, at the same time both of them are known as unknown. So also is of knowledge.

सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषयः ।

Says Prakāśātmayati in his Pancapādikā Vivaraṇam. In case of the mind this seems to be true.

No physicist has ever made an attempt to find its size, colour, odour or taste. His scales have not been used to weigh it. No laboratory has made an experiment at it. Equally true it is that no chemist has ever used his test tubes in finding the properties of the mind. Is it divisible or not? Is it of atomic size? Is it simple or complex? Could it be seen, smelt, or felt? These questions have not been posed before him. No Sergeon's instrument seems to have ever penetrated the mind. Perhaps mind does not come under his domain. Scientists are not worried about it or more correctly it has baffled their attempts.

It is the Yōgi or a Philosopher who did make fruitful attempts to study the mind. According to him the mind is a complex, subtle, invisible and the essence of the Bhūtasūkshmas. It consists of sixteen parts or rather aspects. They are desire, determination, doubt, faith, fortitude, shame, fear, and understanding.

षोडशकलं हि सोम्य मनः। कामस्संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्ये-
तत्सर्वं मन एव ।

— *Chāndōgyōpanishad.*
— *Bṛhadāraṇyakōpanishad.*

It is तैजस and elastic. "तैजसमन्तःकरणं परिणमति" —*Vedantaparibhasha.*

Nothing could excel it in quickness and few could compare. Its rapidity is myriad times greater than that of light. It has no barrier. It flies high up in the sky, it dives into the deep. Like the soft wax of a smith, it retains the impressions of several decades. It is fickle, explosive and full of potentialities. 'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्' says the Gīta. In the evolution of the mind the five subtle Bhutas have their share and functions.

In Vivēkachūdāmaṇi there is an analysis of the mind.

न ह्यस्त्यविद्या मनसोतिरिक्ता मनो ह्यविद्या भवबन्धहेतुः ।
तस्मिन् विनष्टे सकलं विनष्टं विजृम्भितेस्मिन् सकलं विजृंभते ॥

This aspect of the mind is elaborately broughtout in this work. The Author compares the mind to a cat sitting on a kitchen-wall with freedom on one side and captivity and bitter enjoyment on the other. It is this mind that makes the god man and its absence the Man-God!

It is a delightful piece-work exhibiting dalliance of poesy with its music and harmory coupled with graceful style. Thoughts and words fight for supremacy over one another. There is a ceremony about the poetry and profusion.

T. M S. S. M. Library,
Tanjore; 21—8—1959.

P. V. VARADARAJA SARMA M. A.

॥ श्रीः ॥

श्रीकृष्णानन्दकृतिषु

॥ मन्त्रार्णमुक्तावली ॥

ओंकारसन्मणिसमुद्गनिधेयनित्यनीवीमयाय निगमान्तविदां मुनीनाम् ।
आनन्दबोधघनमङ्गलविग्रहाय न्यग्रोधमूलनिलयाय नमश्शिवाय ॥ १ ॥

नक्षत्रनाथपरिपाटलचारुगात्रं मन्दस्मिताञ्चितमुखं स्वसुखालसाक्षम् ।
चिन्मुद्रिकाकलितपुस्तकचिन्हपाणिं पश्याम्यपस्मृतिहरं हरमन्तरङ्गे ॥ २ ॥

मोक्षाय मुक्तविषयैर्मुनिभिः पुराणैः श्रीदक्षिणाननमुपास्यमपास्य मन्दाः ।
मोहो महानयमहो मुषिता हृषीकैर्यद्देवतान्तरमुपासितुमारभन्ते ॥ ३ ॥

भव्यो भवत्सरहितादिभवप्रवाहे यस्मिन् पथि त्वयगमागमखेदखिन्नाः ।
दिष्ट्या महापथिकविश्रमदिव्यवृक्षं देवं वटद्रुतटमङ्गलमाश्रयन्ते ॥ ४ ॥

गम्यं गिरामनिदमादिमसम्भवानामन्तेषु सन्ततसमाधिगतान्तरङ्गैः ।
पारे तमः परचितं परयोगदृष्ट्या दिव्यं वटद्रुतटवासि महः प्रपद्ये ॥ ५ ॥

वस्तामभावुकमरेरजिनं मृगाणामास्तामनाथवदधो वटभूरुहस्य ।
आलम्बतामपि चिताभसिताङ्गरागमन्तस्तमेव शरणं मरणेऽपि कुर्वे ॥ ६ ॥

ते ते समस्तजगतामभिलोभनीया भावा भवन्तु हृदि मे चिरमाविरावीः ।
तेजस्तदेव परमाश्रितवृक्षमूलमालम्बते हृदयमादृतबोधमुद्रम् ॥ ७ ॥

दत्ते स्वयं सघनदत्वमुदारभोगं वागीश्वरत्वमपि वाञ्छितमोक्षलक्ष्मीम् ।
यस्य स्मृतौ सकृदपस्मृतिहारि तेजो जागर्ति हृत्तिमिरमण्डलचण्डभानुः ॥ ८ ॥

क्षिप्रं क्षिणोतु दुरितं मम दक्षिणास्यं क्षीणाघतापसपचेलिमभागधेयम् ।
ज्योतिर्यदान्तरतमं वटवृक्षमूले क्षेमाय दीक्षितमुदीक्षितमात्तपुण्यैः ॥ ९ ॥

णाविष्टवत्प्रकृतिकार्यमिति ब्रुवाणा यन्नामवर्णगुणगन्ध्यपि पाणिनीयाः ।
विद्याविशारदगणेषु गणेयरूपास्तं दक्षिणाननगुरुं गुणयामि चित्ते ॥ १० ॥

मूर्च्छाकुलस्य मुहुरेव भवाधिदावज्वालावलीसमवलीढसुधीकुलस्य ।
आर्तेरपाकरणमाश्वसनीयमास्ते मूर्तं महः किमपि मूलतटे वटद्रोः ॥ ११ ॥

तप्तं तपः परमतीतभवान्तरेषु दत्तं च वित्तमभिगम्य महत्तमेभ्यः ।
आराधिता गुरुजना यदधो वटद्रोरीक्षे महः किमपि मङ्गलदायि साक्षात् ॥ १२ ॥

ये केचिदाजनिजडा अपि चैडमूका मूकाश्च केवलममी यमनुस्मरन्तः ।
चूडापदेषु विदुषामपि वावदूका दीव्यन्ति दिव्यगुरुदेशिकमेनमीडे ॥ १३ ॥

मन्दाक्षमन्थरदृशा शिवयासिताङ्कं मन्दाकिनीपृषतमञ्जुजटाकलापम् ।
चिन्मुद्रिकाक्षगुणपुस्तककुण्डिकाढ्यं श्रीदक्षिणाभिमुखमादिगुरुं भजामः ॥ १४ ॥

ह्यन्ते वसन्ति मुनयो हितदेशनार्था मौनं बिभर्ति मुहुरादिमदेशिकोऽपि ।
पश्यन्त्यथापि परतत्वममुन्तु मन्ये साक्षात्कृते नहि भवत्युपदेशकांक्षा ॥ १५ ॥

मेधाविनोऽपि वसु मे वसनादिकं मे क्षेत्राणि मे क्षितिरियं सकलैव वेंति ।
मे मे गिराजसमजोपमिता वटद्रुवास्तव्यवस्तुविवशा मम शोचनीयाः ॥ १६ ॥

धाम्मा कदापि हृदयं सदयन्तु तस्मिन् धातास्तु वा शतमखो धनदो गुरुर्वा ।
आराध्यमादिगुरुमादरते वटद्रुमूलालयं यदि न मूढमतिर्नमस्यन् ॥ १७ ॥

प्रत्यक्षमाकलयत प्रतिभां पुरस्तादस्ताधिभिर्मुनिभिरन्तरुपासनीयाम् ।
छायामयन्तिमिरमच्छतनुप्रकाशैरातन्वतीं वटतरोस्तरुतानुमेयाम् ॥ १८ ॥

ज्ञान्तानि कार्यकरणानि विविच्य विज्ञैर्यज्ज्ञानयोगनिरतैर्यतिभिर्विवेच्यम् ।
ज्योतिः परं किमपि तद्वटवृक्षमूले वीक्षध्वमक्षिजडिमक्षिपमात्तदेहम् ॥ १९ ॥

प्रत्यर्चनीयकुशला मम ते शुकाद्याश्शाखासु येऽपि बहुपादुरुपादपस्य ।
वाचंयमं कमपि वासितबोधमुद्रमासाद्य सत्सदसि देशिकतां भजन्ते ॥ २० ॥

यत्संभवो यमवतामुचितान्ववाये यच्चापि सद्गुरुपदाब्जपरागसेवा ।
यच्चाप्यपस्मृतिहरस्य हरस्य विद्या सर्वं तदन्यभवसञ्चितभागधेयम् ॥ २१ ॥

छन्दो ममेति बहुपादपि सम्भवेयं यो दक्षिणाननगुरोरुपसंश्रयेण ।
मौनावलम्बमतिलम्बिजटाकलापमासेवितं शुकमुखैरुपयामि साम्यम् ॥ २२ ॥

स्वाराज्यमस्तु दिवि वा दिविषन्निषेव्यं याम्या भवन्तु निरये मम यातना वा ।
क्रव्यादभव्यमपि वा विपिने मृगत्वं स्मेराननं यदि मनः स्मरति स्मरारिम् ॥ २३ ॥

हा हन्त पश्यत समेत वटद्रुमूले मोहं नुदत्किमपि वस्तु मुनीन्द्रगुह्यम् ।
चक्षुःशुचं प्रशमयच्चरणाभिभूतापस्मारमस्ति बहुविस्मयनीयशीलम् ॥ २४ ॥

ओङ्कारध्वनिवासनामुपनिषद्द्योसल्लतावल्लरीं
हार्दव्योमसमुद्यदिन्दुकलिकामन्तर्निशाहर्दशाम् ।
न्यग्रोधद्रुमभूलनित्यनिलयामेकामनाकालिकी-
मच्छाभां प्रतिभां विभावयत तामन्तर्दृगुद्दीपिनीम् ॥ २५ ॥

इत्येषा विहिता विमोक्षपदवीदीक्षागुरोर्दक्षिणा-
मूर्तेरार्तजनावनव्यसनिनो मन्त्रार्णमुक्तावली ।
आकल्पं सुधियामनल्पसुषुमा कण्ठेषु कल्प्या सदा
विद्यामुक्तिवधूस्वयंवरविधौ माङ्गल्यमालायिता ॥ २६ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्देन मन्त्रार्णमुक्तावलिरियं कृता ॥ २७ ॥

मन्त्रार्णमुक्तावली समाप्ता ॥

॥ भक्तिविवर्धनस्तवः ॥

सकृदानतिरर्चना च भूयादुभयोरित्यनुकम्पयालसानाम् ।
अवलम्बितविग्रहैकभावं शिवयोः श्रीसमवायमाश्रयामः ॥ १ ॥

अलिकाम्बकदक्षिणाश्रयाशे जगतीमेव जुहूषता स्मयेन ।
मदनः प्रथमाहुतिर्वितेने समुपासे यमिनामुपासनीयम् ॥ २ ॥

तरुणेन्दुकलाकलापिनं समयोन्मीलितमल्लिकारुचिम् ।
स्मितचारुकराननाम्बुजं शिवयाश्लिष्टतनुं शिवं भजे ॥ ३ ॥

अतनूकृतकामकारुणी सुतनूभावितवामविग्रहम् ।
शरणं करवाणि शङ्करं किमपि ज्योतिरहं शिवङ्करम् ॥ ४ ॥

कुसुमायुधकोपितोऽपि योऽलं दयया तस्य तनुं ददौ प्रियायै ।
अखिलार्तिहरं हरं विना तं कतमं देवमिहाभिराध्नुयामः ॥ ५ ॥

मदनं दहतापि कान्तया कवलीकारयता कलेवरम् ।
अनुरागि जगद्विरागि वा भवता शङ्कर विप्रलभ्यते ॥ ६ ॥

अविषह्यतमेन शाम्यतां भवरोगेण परं भिषज्यताम् ।
शिवतातिमसी वयं विभो शृणुमस्त्वा भिषजां भिषक्तमम् ॥ ७ ॥

क्वचिदेकपदे रसज्ञया परिकृष्येपरतोऽपि चक्षुषा ।
क्वचन श्रवसा बलीयसा तव शंभो किमुदासितुं क्षमम् ॥ ८ ॥

अवरोद्धुमिदं न शक्नुमो विषयाशीविषसङ्गि मानसम् ।
अपि रोद्धुमुदग्रचापलं बत शंभो करवाम किं कथम् ॥ ९ ॥

कृपणा बहवोऽनुकम्पिताः किल शंभो शतशोऽपि मादृशाः ।
न च मामतिदीनमीक्षसे कतमे ते करुणापदं जनाः ॥ १० ॥

अपराधशतेऽपि चार्थनामपरामाः कतमामयञ्जनः ।
कृपणो गिरिशावलम्बतां कृपयैवानुगृहाण केवलम् ॥ ११ ॥

कृपणं कृपयावलोकसे विलपन्वं यदि नाथ नातुरम् ।
क्वनु यामि वदामि किन्नुवा विधिपाकेन विभो निराकृतः ॥ १२ ॥

ननु दीनदयावशंवदो गिरिश त्वं परिगीयसे बुधैः ।
अवलोकय लोचनाञ्चलैरगतिं मामनुकम्पयाखिलैः ॥ १३ ॥

समयं प्रतिपालयन्ति ते शमयन्तो मलमात्मनोऽमराः ।
भगवन् कृमिकः कियानहं न दया ते यदि दीनवत्सला ॥ १४ ॥

भवतेऽखिललोकबन्धवे भगवन्न स्पृहयेत को नु वा ।
निपुणं परिमृश्य निर्गतिं कृपणं मां कृपयाऽवलोकय ॥ १५ ॥

अनु...विति संविभाव्यते न मयैकेन भवानुमापते ।
शमयञ्जगतीतमोतति सविता न ह्यनु किञ्चिदश्नति ॥ १६ ॥

उदितारुणकोटिरोचिषं न हि पश्यामि भवन्तमीश किम् ।
अथवा कथमन्धलोचनो जगतीचक्षुरुदीतमीक्षताम् ॥ १७ ॥

अधुनापि विचीयते पदं तव शंभो शिव सम्पदां पदम् ।
विबुधैरपि वेदमौलिषु स्मरतादस्य कथन्नु मादृशः ॥ १८ ॥

प्रयते परिणाहिचेतसा पदवीमेष दवीयसीमपि ।
अधिमन्तुमयुग्मनेत्र ते विषमं पश्य विमोहयन्त्यणम् ॥ १९ ॥

मम धावयति स्मरो मतिं मृगयावीव मृगीमनुद्रवन् ।
परिचारयितास्मि ते कदा पदयोरीश्वर तामनागसम् ॥ २० ॥

मतिमीश मम त्वदाश्रयां स्मरतेवापकृतं स्मरेण ते ।
असतीमिव विप्रलुम्पनात् त्वदलीकाक्षि पुनश्च तृप्यतु ॥ २१ ॥

रतिराश्रयते भवत्पदं मतिरन्वेति मनो ममापि ताम् ।
अपुनःश्लथसङ्गमं तया लभतामीश भवानिवोमया ॥ २२ ॥

तव पादनखेन्दुमण्डलीमवतंसीयति मय्युमापते ।
सकलाय दया विसृत्वरी शिवभावाय सुरापगायताम् ॥ २३ ॥

न विधातरवैमि ते विधां वरिवस्यानुविधौ जडाशयः ।
दययैव तथापि पाहि मामुदवाहा इव शुष्यदोषधिम् ॥ २४ ॥

दयसे भजतः स्वतो विभो किमु दैन्येन ममाभिचोदितः ।
नवचन्दनमेव शीतलं ननु कीदृग्घनसारलोलितम् ॥ २५ ॥

अनधीतभवत्पदाम्बुजान् अनवेतत्वदुपासनाविधीन् ।
यदि रक्षसि नाम रक्षिता शिव के कर्मकरं न बिभ्रति ॥ २६ ॥

अभिषिञ्च दयारसैर्विभो भवदाहज्वलनो न मां दहेत् ।
अमृतैरपि किं प्रसेचिते भसितीभूतरसालपोतकैः ॥ २७ ॥

यदि नाम तवानुपासिता दयनीयो न भवामि नाथ ते ।
अनपेक्षितसेवमम्बुदं जगदुज्जीवनमेष किं ब्रुवे ॥ २८ ॥

विभवत्युचितं दशाननो वरिवस्यञ्जगतामधीश्वरम् ।
उदकृन्तदयं शिरो निजं करुणोऽपीश परं तदैक्षथाः ॥ २९ ॥

मिषितेऽपि नहि प्रभूयते जगता येन शिव त्वया विना ।
सनिसर्गसुहृत्त्वमात्मना सदृशं ते मम यत्प्रसीदति ॥ ३० ॥

शिव सत्प्रवणाप्यतन्न मामनुकम्पा तव हातुमर्हति ।
नहि नन्दितचन्द्रशालया विपिनं चन्द्रिकया विहीयते ॥ ३१ ॥

सुकृतस्वकृतेन कर्मणा भगवन्निर्वृणुतेऽपुनर्भवाः ।
अनुगृह्य सुदीनमाशु मामनुकम्पा सफलायतां तव ॥ ३२ ॥

यदि नाम यथापुरं विभो परिखिद्येय भवाम्बुसम्प्लवे ।
प्रकृतिं करुणामृदीयसीमनुतप्तासि तवैव दुःस्थितिम् ॥ ३३ ॥

व्यसनात्मकमीश मास्महन् व्यसनं मां विषमेव वा विषम् ।
करुणं बत वर्तयिष्यते करुणा दीनपराङ्मुखस्य ते ॥ ३४ ॥

विधिदुर्ललितैरये विभो विविधाधिग्रहनिर्गृहीतधीः।
विवशोऽहमुवाच दुर्वचं यदुपालम्भमदः क्षमस्व मे ॥ ३५ ॥

कमुपालभतामयञ्जनः करुणात्मन्नसुखावसादितः।
अयि दीनजनानुसारिणी करुणा मृद्धितमा तवैव चेत् ॥ ३६ ॥

न भवन्तमुपालभे विभो मम दैन्यन्तु निवेदयामि ते।
परिपाककटू रुजा निजा न निवेद्या भिषजे किमातुरैः ॥ ३७ ॥

शरणागतवत्सलोऽसि किं शमिताशेषशिवेतरोऽसि किम्।
अनुनाथकथा कदर्थना न विषह्येत कथं त्वया विभो ॥ ३८ ॥

अयि नाथ भवानुपेक्षते भजमानं निजतन्त्रवेष्टितः।
मम च त्वयि रूढसङ्गतं हृदयं सीदति हा करोमि किम् ॥ ३९ ॥

अयि नाथ भवानधीश्वरो जगतीपूजनया जडीकृतः।
शरणं कमुपैम्यहं पुनस्त्वदृते हन्त जगन्निरीश्वरम् ॥ ४० ॥

अभियामि यदन्यमीश्वरं विजहत्त्वा जगतीपरायणम्।
कनकं परिहृत्य बालिशः कटकीयामि विभो न किन्तमाम् ॥ ४१ ॥

व्यसनैरुपतापिना मया न चिरं क्रीडितुमीश ते क्षमम्।
परिखेलति हन्त जम्बुको व्यथते किन्तु कुलीरजीवितम् ॥ ४२ ॥

असुखानि चिरं चिकीर्षता विधिना मे विपरीतवर्तिना।
करुणारसकोमलं विभो हृदयं किं तव कर्कशीकृतम् ॥ ४३ ॥

यदनन्यगतीनुपेक्षसे विषमाक्षाखिलकामदोऽपि सन्।
परितापजुषोऽपि मादृशः तदभव्यं तव दुश्श्रवं मम ॥ ४४ ॥

अवितुर्जगतामयं जनः किमितीशान भरायते तव।
अपचातकमम्बुदावलिर्नहि तापोपशमाय वर्षति ॥ ४५ ॥

समयन् स्वयमैन्दवीं कलां अपि कंकालमलंक्रियाविधौ।
अशुचिं परिहर्तुमीहते कथमीशान भवानिमं जनम् ॥ ४६ ॥

अवतंसयसीह निम्नगामपि हालाहलतापशान्तये ।
अतिहालहलाधिशान्तये मम चापीडय पाद्यमम्बु ते ॥ ४७ ॥

अभिवन्दितुमैन्दवीं कलामहमीहे भवतावतंसिताम् ।
अयि नाथ भवार्कतापितं हृदयं शीतलयिष्यते तया ॥ ४८ ॥

दशमी भगवद्दशा पुरा किल मामाविरुदेति दुःसहा ।
अधुनैव ममावलम्बतामभयं ते हृदयं पदाम्बुजम् ॥ ४९ ॥

अमृतस्रुति पादपङ्कजे तव शंभो न परं स्वदे ततः ।
स्वदते न हि काशकोरको मकरन्दस्रुति पङ्कजेऽलिने ॥ ५० ॥

अपि दुर्लभमीश मानसं न भवन्तं मम हातुमीहते ।
न हि कामपरो मनोहरे मनुते लाभमलाभमेव वा ॥ ५१ ॥

भगवन्भवगोचरेऽपि मे धिषणा त्वत्पदपद्मकाम्यति ।
असितासु तमीषु लिप्सते न चकोरी किमु चारुकौमुदीम् ॥ ५२ ॥

सकृदप्यवभाहि मानसे मम च व्येतु भवाधिसंप्लवः ।
मिहिरे हि नभस्युदित्वरे तिमिरं सत्वरमेव शाम्यति ॥ ५३ ॥

भगवन्नवधीरितस्त्वया परिगृह्येय परेण केन वा ।
न हि मातुरसंमतो जनो भजति ग्रामजनस्य संमतिम् ॥ ५४ ॥

ननु भूसलिलानलानिलद्युशशाङ्कारुणसोमपाकृतिम् ।
भुवनं परिभासि भूतये जगतामेव भवद्विभूतयः ॥ ५५ ॥

त्वदधीनमिदं यदस्ति मे तव चाहं परमेश योऽस्म्यहम् ।
शरमेवमुमापते मम प्रणतं मां परिपालय प्रभो ॥ ५६ ॥

जननी जनकस्त्वमेव मे गुरुराराध्यतमश्च दैवतम् ।
शरणं परमं परा गतिः शिव सर्वस्वमपि त्वमेव मे ॥ ५७ ॥

अहिमांशुकलावतंसकैः अनलीकाञ्चितदिव्यलोचनैः ।
अमरैर्वरैरुपासितैरनुमाजीवितवल्लभैरलम् ॥ ५८ ॥

यदि ते पदपङ्कजं नमन् यदि वा नाम सदाम वालपन् ।
यदि मङ्गलविग्रहं स्मरन् भव भूयासमहं भवे भवे ॥ ५९ ॥

विहिताञ्जलिसम्पुटेन मूर्ध्ना विगलद्बाष्पकलाकुलेन चाक्ष्णा ।
वपुषा पुलकाञ्चितेन शंभो भजतस्त्वामभिपद्यतां ममायुः ॥ ६० ॥

इति भक्तिविवर्धनस्तवं यः पठति श्रीशिवसन्निधौ यतात्मा ।
दुरितानि विधूय दूरतोऽसौ सकलं मङ्गलमश्नुते सदैव ॥ ६१ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्देन रचितः स्तवो भक्तिविवर्धनः ॥

कृष्णानन्दकृतिषु भक्तिविवर्धनस्तवः संपूर्णः ॥

॥ मृत्युञ्जयाष्टकम् ॥

भक्त्यैकान्तवशंवदेन भवते संकुप्यता वेत्सि य-
न्मार्कण्डेयमुपद्रवन्पुरभिदा निर्भर्त्स्यसे वक्षसि ।
स स्वामी मम शङ्करः शमन ते दर्पं विनेता पुनः
यन्मामन्तिमदुर्दशागतमिव प्रत्येषि पर्येषि च ॥ १ ॥

अश्रान्तं प्रभवाप्ययक्रकचयोरश्रान्तरापीडितं
भद्रं भावि जनुर्भविष्यति पुनश्शर्मेति चिन्तायतम् ।
पर्यावृत्तमिदं जगत्परिमृशन् संसारचक्रे भृशं
संत्रस्तश्शरणागतोऽस्म्यशरणो मृत्युञ्जय त्वामहम् ॥ २ ॥

यावत्सैरिभवाहनं सरभसाऽधिक्षेपरूक्षाननं
बद्धभ्रूकुटिदुर्निरीक्ष्यविकटध्वस्ताक्षमीक्षे लसन् ।
तावत्त्वामकलङ्कचन्द्रसुभगस्मेराननाम्भोरुहं
पश्येयं वृषभाधिरूढमुमया सानन्दमग्रेसरम् ॥ ३ ॥

कायेषु व्यथमानमर्मसु कफे कण्ठोपरोधोद्यते
सीदद्वृत्तिषु चेन्द्रियेषु मनसि व्यामोहमासेदुषि ।
पर्यस्ते भिषगुत्तमैः परिजने बाष्पाकुलाक्षे परं
पश्येय परमेश ते पदयुगं नाहं परेताधिपम् ॥ ४ ॥

भैषज्याद्भिषजि स्थिते परिजने पर्याकुलाक्षे भृशं
त्रुटयन्मर्मणि वर्ष्मणि प्रतिभये काले समासीदति ।
उत्क्रान्तिश्रममुद्धरणं प्रशमयन्नुत्तुङ्गसत्पुङ्गवो-
पारूढो जगदम्बिकासहचरः स्यान्मे पुरस्तान्मृडः ॥ ५ ॥

संसीदत्यसुपिञ्जरे भयभरक्रान्तान्तरे जीविते
प्रत्यासीदति कालकिङ्करगणे चित्ते मुहुर्मुह्यति ।

अन्नद्धपरवशवा सह दयासारैस्समाश्वासयन्
मा भैषीरिति मामुपैतु भगवानाराद्‌माकामुकः ॥ ६ ॥

क्रोधाधर्तितलोचने कुटिलितभ्रूभङ्गरौद्रानने
सोल्लुण्ठस्फुरिताधरे सरभसं काले समासीदति ।
संत्रासव्यथितान्तरस्य मम संत्राणाय सन्नह्यते
शंभो ते त्रिपुरान्तकान्तक हरेत्युज्जृम्भतां काहली ॥ ७ ॥

अन्वश्चद्‌द्रुहिणादिकार्यनियमव्यासङ्गभाजि त्वयि
प्रत्यासन्नकृतान्तकिङ्करभयक्रान्ते नितान्तं मयि ।
श्रीमृत्युञ्जय शङ्करान्तकरिपो देवेत्युदारध्वनिः
शंभो ते जयकाहली यमभटत्रासाय सञ्जायताम् ॥ ८ ॥

मत्क्षेमाय तवौपवाह्यवृषभग्रैवेयघण्टाध्वना-
वारादश्वति वञ्चितान्तकभयः प्रेक्षेय साक्षादहम् ।
वित्रासद्रुतसैरिभं विनिपतद्विभ्रान्तसैन्याकुलं
विस्रस्ताखिलशस्त्रमन्तकचमूमन्वग्यमं विद्रुताम् ॥ ९ ॥

मर्माणि व्यथयन्तु गाढकुपिता निस्सन्धिबन्धानि मे
व्याकर्षन्त्वसुपञ्जरं यमभटाः पाशैर्दृढं पाशितम् ।
संताम्यन्तु ममेन्द्रियाणि सकलान्यन्ते परं ते विभो
चेतश्चुम्बतु कालमाथिचरणं त्वामम्बिकार्धासनम् ॥ १० ॥

नित्यं यो नियतः पठत्यवहितो मृत्युञ्जयाख्यस्तवं
ध्यायन्नात्मनि सुप्रसन्नवदनाम्भोजे भवानीपतिम् ।
निर्धूतापमृतिस्स जीवति चिरादन्ते च मृत्युञ्जयं
साक्षात्कृत्य महीयते शिवपदे निश्शोकमोहे सुखम् ॥ ११ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्दयतीन्द्रेण कृतं मृत्युञ्जयाष्टकम् ॥

कृष्णानन्दकृतिषु मृत्युञ्जयाष्टकं संपूर्णम् ॥

॥ मीनाक्ष्यष्टकम् ॥

सामीनश्रीरञ्जितपङ्केरुहकान्तेर्नामी यस्याः पादसरोजद्वितयस्य ।
कामी नाक्षीणाशुभवृत्तिर्लभते तां सा मीनाक्षी पातु समीकृत्य ममागः ॥ १ ॥

अव्यादव्यापादरतध्येयपदाब्जा दिव्या दिव्यापन्निचयान्मामपचेयात् ।
स्तव्या भव्यापादनशीला निगमान्तैरव्याहारव्याप्तृतिभूमीनदृगीशा ॥ २ ॥

विद्युल्लेखाविभ्रमविश्राणनदीक्षाबद्धोत्साहश्रीपरिरब्धाङ्गलतायाः ।
मुग्धाकारस्मेरमुखेन्दोर्गिरिजायाः किञ्चिन्मे निष्किञ्चनगम्यं प्रतिभाति ॥ ३ ॥

पाणौ वीणामादधती कीरकिशोरध्वानध्मातः स्वञ्चिततन्त्रीध्वनिभेदम् ।
लावण्याब्धिर्लक्षितकारुण्यकटाक्षा श्यामा कामं मीनदृगम्बा परिपातु ॥ ४ ॥

कामारामोद्दामकटाक्षोत्कलिकाभिः क्षेमक्षामक्षालनदक्षा सुजनानाम् ।
देवी वाचामाचरणान्तादनवद्या भायादन्तस्सन्ततमम्बा शफराक्षी ॥ ५ ॥

चारुस्मेराम्भोरुहकिञ्जल्कसरूपामापादाग्रादञ्चितभूषामुषिताङ्गीम् ।
मालापाशौ पुस्तकचापौ च दधानां मीनाक्षीं तां चेतसि बालां कलयामि ॥ ६ ॥

वेणीमूलामुक्तनिशानाथवतंसा फालोन्मीलल्लोचनसङ्घर्षिललामा ।
कीरालापभ्मापितमन्दस्मितवक्त्रा मीनाक्षी नश्चेतसि नित्यं प्रतिभायात् ॥ ७ ॥

अम्बाकाराः सन्तु सहस्रं सुरवन्द्याः किंचालम्बे कामपि मूर्तिं कमनीयाम् ।
लीलाकीरालंकृतपाणिं ललिताङ्गीं लोलापाङ्गां मीनदृगाख्यां शिवपत्नीम् ॥ ८ ॥

प्रातःकाले जल्पति यो ना नियतात्मा स्मृत्वा देवीमष्टकमिष्टार्थदमेतत् ।
तस्य प्रीता सम्पदमुच्चैरपि वाचं दद्याद्दयालोकसवित्री शफराक्षी ॥ ९ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्दसरस्वत्या श्रीमीनाक्ष्यष्टकं कृतम् ॥

कृष्णानन्दकृतिषु मीनाक्ष्यष्टकं संपूर्णम् ॥

॥ उपदेशदशकम् ॥

अम्बरमहागहनडम्बरविडम्बिमारवमरीचिपरिवाहपरिहासि ।
सत्यदृशि यत्र समुदेति वियदादिः तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ १ ॥

चित्रकमभित्तिकमिवोदयति यत्र व्योमनि विभूमनि समस्तमनवस्थम् ।
सत्यसुखबोधवपुरस्ति यदनन्तं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ २ ॥

उद्धनघनस्थितिविमोहसमुदश्चत्ताडवविनिम्नजगदायसविकारैः ।
व्येति न समेति न च यत्परमपारं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ३ ॥

अल्पकमनल्पमहिमन्यपविकल्पे यत्र च न पश्यति शृणोति न च किञ्चित् ।
यत्परमभूमसुखवस्तुपरिगीतं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ४ ॥

अम्बरमणेरमलबिम्बमनुबिम्बद्भङ्गिमतरङ्गगुणसङ्गतमिवाब्धौ ।
बुद्धिगुणबद्धमिव यत्तदनुविद्धं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ५ ॥

कस्तव स सप्तकवितस्तिमितकायो दुस्तरसमस्तरुगुपस्तरुणको यः ।
यस्तु तमसः परमपारसुखरूपं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ६ ॥

पश्यति शृणोति परिजिघ्रति च येन स्वादयति वाचमभिव्यक्त्यविशयेन ।
शश्वदधिविश्वमनुपश्यति धियं यत्तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ७ ॥

सत्वगुणवृत्तिपटुनृत्तपरिवर्तानिङ्गति मणिद्युतिनिरङ्गमपसङ्गम् ।
तेजयति यत्र रविचन्द्रमुखतेजः तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ८ ॥

वस्तु जगतश्च यदनन्तरमबाह्यं यस्य च जगत्तदनन्तरमबाह्यम् ।
यच्च जगदेतदजगच्च परिशुद्धं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ९ ॥

अद्वयमनादिमदनन्तरमनन्तं सन्ततसुखं तदुपशान्तगुणमोहम् ।
ज्योतिरनुदीतकमनस्तमितमेकं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ १० ॥

गुह्यमिदमेतदुपदेशदशकं यस्त्यक्तसकलैषणगुणी गुरुपुरस्सन् ।
शीलयति सोऽपि च गृणाति गुरुभूतः तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ११ ॥

निस्तमसि नीरजसि निर्गलितसत्वे तेजसि विवेकजुषि भेदमतिशून्यम् ।
यद्वचनमानसपदादिगमनन्तं तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ १२ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
उपदेशदशश्लोकी कृष्णानन्देन निर्मिता ॥

कृष्णानन्दकृतिषु उपदेशदशकं संपूर्णम् ॥

॥ सपर्यापर्यायः ॥

श्रीशः श्रेयस्कामिभिरभ्यर्चनतोऽन्तर्निध्यानाद्यानित्रियतामत्र जगत्याम् ।
सत्तामात्रानन्दचिदात्मानमनन्तं सोऽहं तं त्वामर्चयितुं न प्रभवामि ॥ १ ॥

स ध्येयो यः संसृतिभूमिर्व्यवधानादध्येयो नस्त्वं तु न साक्षादपरोक्षात् ।
ध्यायच्चानुध्यायसि चेतः स्वयमन्तस्तं ध्यायामि त्वामिति वन्ध्यात्र मनीषा ॥ २ ॥

सर्वानन्यस्स त्वमबाह्यान्तरभावो बाह्यञ्चास्याभ्यन्तरमप्यस्यखिलात्मा ।
नित्यप्रत्यासन्नसतस्तस्य तवात्मन् नाहं जाने किंविधमावाहनकर्म ॥ ३ ॥

ओतं प्रोतं यत्र समस्तं जगदेतत् सर्वाधारे तिष्ठति संबाधविहीनम् ।
भूमंस्तस्य स्वे महिमन्येव सतस्ते को नामासावासनसङ्कल्पविडम्बा ॥ ४ ॥

अक्षादिभ्यो यस्य परस्य प्रतिपत्त्या संसाराध्वन्यप्यतिपन्नस्सुखमेति ।
आत्मंस्ते तस्यागतिगत्याद्यतिभूमेर्मिथ्या नाहं केन कथं स्वागतिकः स्याम् ॥ ५ ॥

इन्द्राद्याः स्युर्यस्य परस्यामरवर्या विद्यामात्रालेशवशेनापि सदर्घ्याः ।
तस्याद्यस्यापाणिपदादेः कथमर्घ्यं दद्यामद्यानर्घविभूतेरुदबिन्दुम् ॥ ६ ॥

विश्वात्मैको यस्य तु पादो न विमेयः पादाश्चान्ये पण्डितरूपैरपि मृग्याः ।
तस्यारूपस्यापदमूर्धादिविभक्तेरापाद्यं किं केन कथं वा तव पाद्यम् ॥ ७ ॥

सन्ध्या नद्यो यस्य च वास्तेयमुदन्वान् मेघाः केशाः प्राकृतविश्वापघनस्य ।
तस्यापेतप्राकृतसंबोधतनोस्ते कल्प्यं मन्ये नाचमनीयं कमनीयम् ॥ ८ ॥

अध्यात्मं यन्मध्वधिदैवञ्च विभक्तं तत्सम्पृच्यैकात्मकमाहोपनिषद्यम् ।
सत्वं सर्वास्वाद्यतमस्सन्मधुपर्कः संप्रीयेथाः किं मधुपर्केण कथं वा ॥ ९ ॥

यत्रैकस्थं सर्वपवित्राखिलतीर्थं निष्णाताः स्युर्यत्र विगच्छद्भवपङ्काः ।
यद्व्योम्नोऽपि व्योम परं ज्योतिरपारं तन्त्वामात्मन् केन विशुद्धं स्नपयामि ॥ १० ॥

लोकालेख्यं वो हितशुक्लासितरूपैः स्यूतं सूक्ष्मैरम्बररूपं गुणभेदैः ।
संपर्याप्तं प्रावरितुं यन्न विभूमन् किं ते तस्या अम्बरमन्यत्कलयामि ॥ ११ ॥

अत्रैगुण्ये यत्र जगत्त्वय्युपवीते सूत्रे स्यूतं भूतमतो विश्लथमास्ते ।
तस्यासव्यादक्षिणसम्पूर्णतनोस्ते कल्प्यं सूत्रं किं त्रिगुणं स्यादुपवीतम् ॥ १२ ॥

यस्यैकांशावेशवशादानखकेशात् भूतं भूतं रोचनमिन्धे रुचकाभम् ।
तस्यास्थूलानण्वपसिद्धावयवात्मन्निर्मेयन्ते किं मनसापि प्रतिकर्म ॥ १३ ॥

यस्यानुध्याविध्युद्वध्याततमिस्रा नालिप्यन्ते कर्मभिरच्छासितमिश्रैः ।
आकाशादेरप्यतिसूक्ष्मस्य विभो ते तस्यालेपस्यैव कुतः स्यादनुलेपः ॥ १४ ॥

आतिष्ठन्ते केऽप्ययनन्ते घनपुष्पं चूडापीडं केचिदपां पुष्पमुशन्ति ।
भूमन्जाने पुष्करपुष्पं त्वयि सर्वं का का पुष्पैस्तेन मयार्चा तव कार्या ॥ १५ ॥

यस्य प्राणो गन्धवहश्छन्दतनोस्ते यस्त्वं गीतः सर्वसुगन्धः श्रुतिमौलौ ।
तस्यामोदप्रीतिकृते ते कथमात्मन् धूपायेयं फल्गुतमैर्गुल्गुलुधूमैः ॥ १६ ॥

अक्षाण्यर्था बुद्धिमनोहंकृतयो वा संदीप्यन्ते सन्दितभावास्तव भासा ।
खद्योतात्प्रत्यस्तवदीपः खलु कल्प्यः तेजो वर्चो द्युम्नदतेजस्वितयस्य ॥ १७ ॥

मृत्युर्यस्याशेषभुजः स्यादुपदंशो यो वाऽश्नीयात् किञ्चन नाकिञ्चनगम्यः ।
यं विज्ञायात्येति पिपासामशनायां नैवेद्यन्ते तस्य निवेद्यं किमिवात्मन् ॥ १८ ॥

पश्यत्यन्यद्यत्र न दृश्यं न शृणोति श्राव्यं ज्ञेयं यत्र विजानाति न किञ्चित् ।
भूम्नस्तस्याशेषविशेषोपशमस्य छत्राद्यैर्वा कैरुपचार्यं तव केन ॥ १९ ॥

सर्वात्माऽसन् यस्स पुरस्तादथ पश्चात् ऊर्ध्वं चाधो दक्षिणतश्चोत्तरतश्च ।
तस्यापारानन्तमहिम्नः कथमात्मन् प्रादक्षिण्यक्रान्तिमहं ते करवाणि ॥ २० ॥

नन्तव्योऽन्योऽसावहमन्योऽसि च नन्ता नैवं भेदं वेद पशू यामतियातः ।
योऽहं स त्वं सत्वमहं स प्रतिबुद्धो बुद्ध्या दध्यान्तस्य नमस्यां तव कोऽहम् ॥ २१ ॥

स्तोत्रं नाम स्याद्गुणिनो यो गुणवादः स्वश्चामेयानन्तगुणो वाप्यगुणो वा ।
प्राध्वं पारे वाङ्मनसाध्वं परमात्मन्नानन्देथास्त्वं स कया नु स्तुतिभङ्ग्या ॥ २२ ॥

यस्त्वं ब्रह्म क्षत्रमशेषा अपि लोका वेदा देवास्सर्वमिदं चासि विभूमन् ।
सोऽहंभूतो मानसशोकानतितीर्णो न प्राप्तव्यं प्रार्थनया ते विमृशामि ॥ २३ ॥

देहं देहं देव इहात्मैव सपर्या सोऽहं तन्मे मोहकथात्यन्तिकशान्तिः ।
कैवल्यश्चातुल्यपरानन्दमवाप्यं नान्यो देवो नापि सपर्या न फलं वा ॥ २४ ॥

कति कति तरवो मे नार्चनाल्लूनपत्राः कति कति न सरस्यस्तर्पणोत्कीर्णतोयाः ।
कति कति न हरीशाद्यालयाः क्रान्तपूर्वा विदितपरमतत्त्वो नाधुना किञ्चिदीहे ॥

सपर्यापर्यायं पठत शृणुत प्रत्यहमिमं विधूयायासं ये परमशिवमाराद्धुमनसः ।
सुखेनैवात्यन्तं सुखमिह च निर्वाणपरमं लभध्वं मोदध्वं जहित भवसङ्कोचमखिलम् ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृतः सपर्यापर्यायः कृष्णानन्देन योगिना ॥

कृष्णानन्दकृतिषु सपर्यापर्यायस्तवः संपूर्णः ॥

॥ अनुभवत्रिंशच्छलोकी ॥

आधायेन्द्रियवह्निपञ्चकमभिप्रज्वाल्य रागेन्धनै-
    श्शब्दादीन्विषयान् हवींषि मनसा सङ्कल्प्य कामस्रुचा ।
यस्यै जुह्वदपारभोगपरमानन्देन सन्मुच्यते
    तस्यै ते परसंविदे भगवति प्राणेश्वरायै नमः ॥ १ ॥

न कर्तव्यं येषां किमपि हृदये लिम्पति रसं
    विधानव्यासेधव्यतिगमनजङ्घालमनसाम् ।
जयन्त्येते धन्याः परमवहिताशेषकरणाः
    परानन्दास्वादस्वरसगुणविज्ञानमधुराः ॥ २ ॥

उपावृत्तैरक्षैरिदमनिदमामर्शविकलं
    कलाशेषेन्द्वाभं गलितकरणीयेतरमलम् ।
असङ्कल्पस्पन्दादलसपरिवाहं परविदा-
    मनालम्बं चेतः परमपि परं चुम्बति न वा ॥ ३ ॥

विद्याविद्युतितेव विद्युदचिरादालीनमन्धं तम-
    स्सापि स्वोदयनिस्सहात्मभरणा दूरे चिरस्थायिका ।
नाकाशं न दिशोऽथवा न तरणिर्नापीन्दुवैश्वानरौ
    पारेवाङ्मनसास्पदं तु परमव्योमैकमोजायते ॥ ४ ॥

गुणत्रेतावर्तत्रिनयनमहाभीषणमुखी
    ममत्वाहम्मानद्वयकुटिलदंष्ट्राग्रविकटा ।
कराला काप्येषा कबलयति हा कालरजनी
    प्रमत्तो लोकोऽयं भ्रमति विषयाशापरवशम् ॥ ५ ॥

सुखाशीरध्यस्तामपि बत न पश्यामि विषयै-
    रनुस्यूतोदीतेरवधिमसुखोल्लोलविततेः ।

अमीषामक्षाणामनुपशमशिक्षाविधिजुषा-
मभद्रैकोदर्का विनयमनुमन्येत क इव ॥ ६ ॥

आरुज्य व्यवहारगोचरचराण्यक्षाण्यविक्षेपतः
प्रत्यासज्य यथोपपादविषयेष्वङ्गस्थितिं कर्मसु।
कार्याकार्यविचारदुर्गतिदशामुत्तीर्य चेतोऽचिरा-
दौदासीन्यरसायनस्य सुहितं निर्वाणमासीदति ॥ ७ ॥

संयम्याक्षाण्यसुभिरबहिर्भावनागन्धमन्त-
स्सत्त्वे शान्तिप्रणयिनि समासज्य निर्लेशलीनम्।
आत्मैकान्तावसितमहिमज्योतिरानन्दसान्द्रं
दग्धैधाग्निप्रतिममयते चेतनो ब्रह्मभूयम् ॥ ८ ॥

अक्षाणि प्रसरन्तु नाम विषयेष्वक्षामकामोद्धुरं
चेतश्चानुविधीयतामनुकलं तानेव सङ्कल्पयत्।
भुङ्क्तामर्पितभोगमेभिरपि तैर्यस्योपकारः परं
प्रत्यग्ज्योतिरहं तदस्मि यदिदं देदीप्यते केवलम् ॥ ९ ॥

प्रत्यासीदति यावदिन्द्रियपदं प्राचीनसंस्कारत-
श्चेतश्चेतितुमाचितां सुविविधामारब्धभोगक्रियाम्।
लोहं जाम्बनदावशेषमिव चिद्विद्धं सबाह्यान्तरं
प्रत्यक्चित्यवभासशेषमखिलं तत्तावदालीयते ॥ १० ॥

जक्षत्क्रीडन्नतिमनुभवन्वा वधूभिर्वयस्यै-
रन्तर्ज्योतिस्तनुमुपजनं प्रसरन्नासकामः।
प्रत्यग्ज्योतिर्गलितकरणस्वक्रियाकार्यभेदो
न व्यासेधन्न विधिमथवा बुद्धयते सिद्धयोगी ॥ ११ ॥

विरम विरम कार्याकार्यसङ्कल्पशिल्पादयि हृदय दुरायासदायावसायात्।
परिचिनु परिशान्तिं प्रत्यवेक्षस्व कालं नियमितनिजयत्नं नित्यमारब्धभोगात् ॥

अनुस्यूतं यत्तद्व्यतिभिदुरनामार्थरचने
जगत्येकाकारं सदिदमिति सद्भावविदितम् ।
परं धामास्मीति प्रतिपदयमानः प्रतिपदं
पदं भूमानन्दं विपदपदमासीदति पुमान् ॥ १३ ॥

विमृशतु पदमन्तर्विद्यया तत्पदं वा गुणयतु गुणभोगे वैगुणीमुद्धणां वा ।
समुपनमति साक्षादक्षनिर्वेशपद्यां विषयविषकृशानौ विप्लवन्ते विवेकाः ॥ १४ ॥

आरब्धभोगफलमार्छति यद्यविद्या विद्योदयेपि न पुनर्भवभावहेतुः ।
निर्बीजनीरसफला निकुचत्प्रसूना पर्याप्तपल्लवदशा जरती लतेव ॥ १५ ॥

करबदरवद्विश्वं पश्यन्विनश्वरमाविधेरकरणवशश्चेतः कुर्वन्कुतूहलकुण्ठितम् ।
विगलितबहिर्व्यापारेण ध्रुवेण समाधिना निजसुखपदे निस्त्रैगुण्ये सुखं विहराम्यहम् ॥

यः स्मर्तुर्न पुनस्समेति हृदयं भोगावसानक्षणे-
ऽप्यक्षिस्पन्दलवायुरेव सकलो भोगक्षणो यस्य च ।
आस्तां पूर्वदशा परा च सहजायासस्तदात्वेऽपि यः
तस्मै कः स्पृहयालुरस्तु विषयानन्दाय मन्दादृते ॥ १७ ॥

पश्यामो भुवनं भवार्णवमहावर्तेष्विदं बंभ्रम-
द्भिन्दुश्चासुखविप्लवोदधितरीं विद्यां परब्रह्मणः ।
शान्तिन्नस्सुकरामुशन्ति निगमा विद्या निदानं वयं
वाञ्छामः कथमादिमध्यनिधनेष्वायासमात्तं सुखम् ॥ १८ ॥

आयासैरधिकैर्मनस्तनुगिरामाप्तव्यमल्पं फलं
शान्त्या केवलया परं सुखमनायासेन लब्धुं क्षमम् ।
अहो पश्यत सन्निरस्य रसनामूले सुधास्यन्दिकां
प्राप्तुं वाञ्छति भस्ममोदकमयःप्राकारभङ्गश्रमैः ॥ १९ ॥

नायं लोको मम भोग्यः प्रदिष्टो भङ्क्ता भङ्क्ता भुञ्जते यत्र लोकः ।
सोऽसौ लोको मम भोग्यः प्रदिष्टो यस्मिन् लोका निहिता लोकिनश्च ॥ २० ॥

जीर्णश्शीर्णाङ्गसन्धिर्न विचलति रथः सारथिः सारहीनः
सन्ना एव प्रतुन्ना अपि च न हरयो गोचरेषु क्रमन्ते ।
गाढाधी रत्यधीरस्तदपि च विषयान्भोक्तुमायोक्तुकामो
यस्तस्मै सूर्जिताय प्रणतिरियमसौ मोहविस्फूर्जिताय ॥ २१ ॥

लुलितोल्लुलितविलासं कलितोत्कलिकान्मसंबोधम् ।
आकलयन् जगदखिलं शान्ताहन्ताधिराचरामि महीम् ॥ २२ ॥

साधुसमीरसधर्मा शुभमशुभं वा स्पृशन्नसङ्गगतिः ।
निह्नुतनिखिलविशेषो विचरामि महीं विधूतविधिमोहः ॥ २३ ॥

भाराक्रान्ता धरणिरुदधौ लोलकल्लोलजाले
दृष्टादृष्टं विलुठति यथा मज्जनोन्मज्जनाभ्याम् ।
आनन्दाब्धौ जगदपि तथा तत्वबोधाभिभूतं
द्वैताद्वैतव्यपगततनौ दृश्यते चित्स्वभावे ॥ २४ ॥

निद्रामुद्राश्लथनसमये भाति कुम्भादि यद्वत्
तद्वन्मायाविलसितममुं लोकमालोकमानः ।
अन्तश्शान्ताखिलविषयधीरञ्जितानन्दबोधः
प्राप्तं प्राप्तं सममनुभवन् गूढधर्मश्चरामि ॥ २५ ॥

चित्ते भित्तौ चित्रकर्मेव दृश्यं दृश्यादृश्यं बोधतः कालभेदात् ।
पश्यन्नात्मक्रीडनः पर्यटामि प्राप्तं प्राप्तं भोगमासेवमानः ॥ २६ ॥

परचरितमनिन्द्यं पापकं नाभिनन्द्यं परहितमनुवर्ण्यं पारलौक्यं विधेयम् ।
सुहृदुपचरणीयं सूनृतं त्वेव वाच्यं व्रतमिदमुपदिष्टं केन वा सज्जनानाम् ॥ २७ ॥

सर्वात्मना वयसि निर्गलिते निसर्गजीर्णे जरावलिभिरावलिते शरीरे ।
यद्भेषजाचरणमस्य विमूढबुद्धेरुर्वारुकस्य परमायसपट्टबन्धः ॥ २८ ॥

इतरेतरयोगपरद्वन्द्वं नेताह भोगिनामतनुः ।
प्राचोर्जायापत्योः कथमेकतया न यत्समाहारः ॥ २९ ॥

अहङ्कारोत्तीर्णा विगतविषयाश्लेषकलुषा
  दृशिस्सत्तामात्रस्फुरणपरिशेषात्ममहिमा ।
गिरां दूरे तत्त्वं किमपि परमात्मेति तमसः
  परस्तादात्मा मे जगदपगिरन्ती विजयते ॥ ३० ॥

निर्मर्यादसुखञ्च धर्ममभराशास्यञ्च संमाननं
  विष्वक्कीर्तिममीवदूरविषयं वीर्यञ्च पारे गिराम् ।
यन्मूलं सकलं वदन्ति यतयस्तद्ब्रह्मचर्यव्रतं
  मोहेन श्लथयन्ति मूढमतयो निर्वाणनिश्रेणिकाम् ॥ ३१ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
अनुभवत्रिंशच्छ्लोकी कृष्णानन्देन निर्मिता ॥ ३२ ॥

कृष्णानन्दकृतिषु अनुभवत्रिंशच्छ्लोकी संपूर्णा ॥



॥ प्रशमामृतम् ॥

वेधा हरिरिति हर इति वाणी कमलालयेति दुर्गेति ।
यस्य विभूतय एतास्तं शिवमखिलोपशमपदं वन्दे ॥ १ ॥

वन्दे वाचां देवीं वन्दिजनानन्दकन्दलीकन्दम् ।
प्रतिबिम्बितमिव दर्पणबिम्बे यस्यामिदं जगद्भाति ॥ २ ॥

यद्विज्ञानालोकेन व्यवहितविप्रकृष्टसूक्ष्माणि ।
भास्वन्तस्ते सन्तः स्थेयाः सर्वत्र संशये सेव्याः ॥ ३ ॥

मूकस्वप्नप्रायं परितः खद्योतवत्तमोग्रस्तम् ।
स्फुरितास्फुरितस्वपदं ज्ञानं येषां कृतोऽञ्जलिस्तेषाम् ॥ ४ ॥

अक्लेशकोशसङ्ग्रहमनुपगतप्रकृतिरञ्जनक्लेशम् ।
अपरिचितदण्डयोगं वैराग्यं किमपि जयति साम्राज्यम् ॥ ५ ॥

भूयादिदमिति रागो मा भूदिदमित्ययं पुनर्द्वेषः ।
उभयपदात्ययभावं वैराग्यं जयति सुजनसौभाग्यम् ॥ ६ ॥

उपरतिरौदासीन्यं प्रशमो विज्ञानसंप्रसादश्च ।
वैराग्यमनाभोगः परमसुखश्चेति मुक्तिपर्यायाः ॥ ७ ॥

सो नवमो नवमरसः शान्तस्वानन्दथुस्फुरत्तात्मा ।
अस्य तु शृङ्गाराद्यो भेदो विविधोपधानवशात् ॥ ८ ॥

शमरसमभिविज्ञातुं ज्ञापयितुं चापरान्प्रगल्भन्ते ।
विषयाशावशमन्तःकरणं न नियन्तुमीशते केपि ॥ ९ ॥

कामः स्पृहा च रागो गर्वस्तृष्णा च लौल्यमुत्कण्ठा ।
आशा रतिश्च तापः पर्याया निरयदुःखभेदस्य ॥ १० ॥

सदसद्भ्रान्तिर्मूलं लिप्सोपघ्नो जरा च कार्पण्यम् ।
दैन्यायासः प्रसवः तृष्णाविषवीरुधः फलं दुःखम् ॥ ११ ॥

अमृतं मृत्युरिति द्वयमिदमिह न ममेति यन्ममेत्यपि च ।
न ममेत्यमृतं प्रशमो ममेति तृष्णापरिग्रहो मृत्युः ॥ १२ ॥

अममत्वसुखोपाये तृष्णामयशान्तिपरमसुखे ।
आयस्यन्विषयसुखे गिरिकाग्रहणे गिरिं खनति ॥ १३ ॥

सुखमन्विच्छन् विषये तृष्णां बध्नाति यो मूढः ।
सन्धुक्षति सविधे सः ज्वलन्तमग्निमुष्णालुः ॥ १४ ॥

कियदपि वसु च क्षेत्रं पुनरपि कियदपि च कियदपि च ।
इत्यखिलं ब्रह्माण्डं किंयन्ती केन तृप्यतां तृष्णा ॥ १५ ॥

तृष्णाकालरजन्या आधूना या न शुककोणस्य ।
पर्याप्तं जगदखिलं तर्पयितुं तां प्रभूयते केन ॥ १६ ॥

ह्रीरपि जिहेति परं धैर्यं कातर्यं विवशमुपयाति ।
स्वातन्त्र्यमस्वतन्त्रं भवति तु तृष्णापरिग्रहो यस्य ॥ १७ ॥

तुल्येपि चानुबन्धे महयति विषयं कदापि लघयति वा ।
स्वच्छन्दस्तृष्णाया लघयत्येवाश्रमं महान्तमपि ॥ १८ ॥

तृष्णामोहितचेताः प्रणमति कृपणश्च धनिनमिव पश्यन् ।
घूर्णति स तया शून्येऽनवलम्बेवात्ययेव पिञ्छलवः ॥ १९ ॥

वनमयते खनति महीं गिरिमधिरोहत्यपां निधिं विशति ।
परिचरति पापजातिं किमिव न तृष्णातुरः कुरुते ॥ २० ॥

प्रणमति कमपि प्रलपति किमपि प्रकृतं वचोऽथवाऽप्रकृतम् ।
शिव शिव बहु विक्रियते तृष्णाविषमज्वरातुरो मनुजः ॥ २१ ॥

अस्पृश्यमपि पदेन स्पृशति पदे मादनमिवसकलाङ्गः ।
दर्शयति दीनभावं ग्रस्तस्तृष्णापिशाचिकया ॥ २२ ॥

व्यालाचरितेपि वने हिततृणचारी मृगोपि वरम् ।
तं तु धिगनुधनिनं यः स्वोदरभरणाय सहति सन्तापम् ॥ २३ ॥

ईषद्ग्राहं गहनं घोरं वाराशिमाशया विशतः ।
कष्टमिदं तु यदग्रे तिष्ठति कृपणो दुरीशस्य ॥ २४ ॥

श्लथमिव सिचयं ग्रथयन् अङ्गे लग्नमिव किमपि संमार्जन् ।
अनभिमतमेव धनिनो विक्रियते हन्त तृष्णया क्रान्तः ॥ २५ ॥

देव स्वामिन्नार्य प्रसीद नाथेति नेश्वरं न गुरुम् ।
शिव शिव जठरबुभूषा कैषा कापुरुषमाह किं धनिकम् ॥ २६ ॥

पश्यत्यन्यं धनिके कथयति चान्येन धनमदस्खलितम् ।
पश्य बलं तृष्णायाः स्वयमयमनुमोदते कस्मात् ॥ २७ ॥

बहुचाटुरटन्धनको धनिकेनाकर्णितावधीरणया ।
पश्य फलं तृष्णाया ह्रीणो दीनश्च भर्त्स्यते सकलैः ॥ २८ ॥

अवनतिमधिकामञ्जलिमश्लथबन्धं समस्तरदविवृतिम् ।
दुर्धनिके दैन्योक्तीस्तृष्णैका शिक्षयत्युपाध्याया ॥ २९ ॥

तिर्यक्प्रेक्षिणि पुरुषे भयतरलाक्षः स्वदैन्यविनिवेदी ।
कृच्छ्रं जीवति कृपणो धिक्कष्टं तृष्णिका विडम्बयति ॥ ३० ॥

नाट्यानुरञ्जनाय नापि महेशानसंप्रसादाय ।
न पृथग्जनकुतुकाय च नानाभिनयैश्च नटति किं कृपणः ॥ ३१ ॥

कृपणोऽभिनयति करुणं दीनवचःप्रणतिदृष्टिचापल्यैः ।
पुष्यति रौद्रं धनिको बीभत्सं प्रेक्षकस्तु हास्यमपि ॥ ३२ ॥

अन्वयमुन्नतमभिजनमखिलकलाकौशलञ्च सार्वज्ञ्यम् ।
तृष्णैका नृपतिसभे प्रहसननटनाङ्गहारयति ॥ ३३ ॥

उपसर्पत्यपसर्पति वक्तुमिव प्रस्तुवंश्च बिभ्यदिव ।
उत्तिष्ठत्युपविशति च तृष्णाविवशः कियन्नृपे नटति ॥ ३४ ॥

न स्वस्य च न स्वानां शाम्यति तृष्णाज्वरोत्कलिका ।
किं सेवन्ते कृपणा भूपतिरिति सञ्चरत्प्रेतम् ॥ ३५ ॥

आस्तामर्थिजनोऽयं स्वीयजने वा कियत्कदोपकृतम् ।
नृपतिं निहीनवृत्त्या सेवन्ते हन्त तृष्णयैव हताः ॥ ३६ ॥

नरपतिरालोकिष्ट स्मयते स्म प्रत्यवेक्ष्य मामद्य ।
इति तृष्णाविवशमतिर्निस्त्रपमनुभाषते सदसि ॥ ३७ ॥

किमितः कुम्भीपाके यदि वदनं दृश्यते दुरीशस्य ।
आत्मम्भरिममुमपि श्रयते तृष्णाऽऽतुरन्तु धिग्धिक्तम् ॥ ३८ ॥

नरपत्यन्तरवेद्यैः दत्तायुर्बाह्यचेटिकामपि यत् ।
कृपणो नाथति नृपतेर्निवेदयेतीह किन्वितो वीचेः ॥ ३९ ॥

धनपतिहतकस्य पुरः श्वजातिललितं चिरं चरन्नन्तः ।
सर्वस्येष्ट इव बहिस्तृष्णानिहतोऽखिले करोतु स किम् ॥ ४० ॥

यद्राजानं वशयति यत्परिजनमस्य सान्त्वयति ।
यदपत्रपते चान्तर्भावी लाभस्स कस्य समः ॥ ४१ ॥

कति कति परहितरहिताः कुक्षिम्भरयो न धनिगृहश्वानः ।
उपतानपि बत कृपणास्ते चाढ्य तेषु सन्ति किं ब्रूमः ॥ ४२ ॥

राजा स तव मम त्वं त्वदधीना वयमिहेति नृपचेटम् ।
अनुनाथति कृपणं यत् किञ्चिदिह लभ्येत किन्न जानीमः ॥ ४३ ॥

ब्रह्माण्डं कियदेतत् कियती चास्मिन्वसुन्धरा सकला ।
तत्रासंख्या भूपाः कृपणास्ते किन्नु ददतु कृपणाय ॥ ४४ ॥

कणमपि ददतमुदारं कृपणं तद्दानतो मनुते ।
कृपणोऽयं किमसाविति तूलयति तृष्णा मिथः पश्य ॥ ४५ ॥

आजीवन्नतिसृष्टं कियदपि ददतं मितम्पचं ब्रूते ।
चर्वन्नृजीषमिक्षोः कृपणं निष्ठीविनं क्षिपन्निव सः ॥ ४६ ॥

सम्पदमुष्य समग्रा गहनमधूदुम्बरो भृशं फलितः ।
क्रियतामप्याजीवो निह्नुमहे नान्तरस्य यदि शङ्काः ॥ ४७ ॥

सम्पदमुष्य समग्रा किम्पाकः कानने भृशं फलितः ।
क्रियतामप्याजीवो नहि नहि शोभैव पश्यतां दूरे ॥ ४८ ॥

अनलंबुद्धिस्तृष्णा तत्कार्पण्यं तदेव दारिद्र्यम् ।
आलोकेशस्तम्बं तुल्यमिदं तत्र कस्य का सम्पत् ॥ ४९ ॥

अजिरे सुरतरुवाटो गोष्ठे सुरभिव्रजो गृहारामे ।
चिन्तामणिरत्ननिगिरयः किमलम्मतिरस्ति सत्यमीरयत ॥ ५० ॥

परतृष्णासमवायात् ईर्ष्याविषयोपरोधतः क्रोधः ।
उद्यमभङ्गादाधिर्देहलविधिनेव कन्दलति तृष्णा ॥ ५१ ॥

वल्गति तृष्णाविषये यस्या भावं ममत्वमुत्कुरुते ।
पश्य तयोः कार्कश्यं यदयमसन्नेव संरुजति ॥ ५२ ॥

गर्धयति वर्धमाना गुणमिव विषयेषु पुष्णती तृष्णा ।
ते पुनरनया मृष्टा दृष्टा दृष्टिविषविषधरायन्ते ॥ ५३ ॥

नृपचोरादेरर्थे रोगवियोगादितो भोगे ।
मृत्युज्वरादेर्देहे भक्तं क्लिश्नाति भयमयी तृष्णा ॥ ५४ ॥

प्राणपरित्राणाय प्रायः प्राण्यर्थतृष्णया ह्रियते ।
पश्य विपर्ययममुया रञ्जितहृदयो रणाङ्गणं विशति ॥ ५५ ॥

यदि तृष्णामुद्धणयेत् यदि वाऽमर्षं भयं विषादं वा ।
मा भूत्पदमैन्द्रं वा वैधं वा वैरिणामपि च ॥ ५६ ॥

विषयाधिगमे भङ्गो निर्वेदो विषयदोषसंबोधः ।
लब्धव्यान्तरविरहः प्रायस्तृष्णाधिशमसुखोपायः ॥ ५७ ॥

प्रकृतिरियं तृष्णायाः लाभे लाभे विवर्धते वियतः ।
भग्नोद्यमभूयिष्ठा क्षीयति क्षीणे वशमसुखं सूते ॥ ५८ ॥

क्रियदपि लब्धं लब्धं तृष्णोपेक्षा तु लब्धलब्धव्ये ।
आद्योद्वेगत्रहान्या शान्तरसप्राणवहनाडी ॥ ५९ ॥

तृष्णा यदि किं निरये दवदाहमयं यथैव जगदखिलम् ।
शान्तिर्यदि किन्त्वमृते यथैव चन्द्रातपायते विश्वम् ॥ ६० ॥

अन्तःकरणे शान्ते कान्तं जगदिन्दुशीकरैकान्तम् ।
तृष्णाविषानलोष्मे सकलं कालानलोष्मलं भीष्मम् ॥ ६१ ॥

अर्थानथवा कामान् आशास्ते तृष्णया यस्मात् ।
यदुपक्रममस्यामी स एव धर्मः स्वयं सेव्यः ॥ ६२ ॥

अर्थेऽथवापि कामे यामनुबध्नन् सदा तपति ।
तदुपशमे तां तृष्णां बद्ध्वा सद्यः सुखी भवति ॥ ६३ ॥

पुष्णात्यनर्थजालं तृष्णैका सत्यमन्यदास्थाभूः ।
शमविषया पुनरेषा कतकरजोन्यायमनुसरते ॥ ६४ ॥

न धनेन क्रेतव्या नापि च गिरिगह्वरे विचेतव्या ।
निर्विण्णे करणगणे जोषं या सा दशा शान्तिः ॥ ६५ ॥

न शरीरस्यायासो न च कापि ग्लानिरिन्द्रियगणस्य ।
न च हृदयस्य विषादः शमसुखसम्पत्तिसुकरतां पश्य ॥ ६६ ॥

तच्छास्त्रं स विवेकः सा विद्या सा क्रिया विनावद्या ।
दर्शयति निर्विमर्शं शान्तरसस्रोतसो यदि प्रसरम् ॥ ६७ ॥

स विवेको न विवेको येन हि विषयेषु सदसदादिमयः ।
इदमद इति विवेकः कृमिकीटादेरपि प्रकटः ॥ ६८ ॥

आशावैवश्यमलं शमयितुमनलं प्रयस्यतो यस्य ।
तस्य च योगाभ्यासः केवलबुसराशिचर्वणायासः ॥ ६९ ॥

आशा परमायासः स्वाम्यं वैषम्यमन्तरङ्गस्य ।
भोगश्च रोगयोगः शान्तरसप्रवणचेतसो भाति ॥ ७० ॥

गाढनिमग्नो विषये दुःखैरपि यो वरं सुखी मूढः ।
उष्ट्र इव लगुडघातैः शान्तो न त्वक्षिपातमिव खेदी ॥ ७१ ॥

अनुहृष्यति नोपेतं नापेतं वापि किञ्चिदनुतपति ।
पश्य विरागौदार्यं शान्तरसास्वादशीतलस्वान्तम् ॥ ७२ ॥

कवलयतु कालदहनो विश्वं सप्तार्णवी विलापयतु ।
उद्घूर्णयतु मरुद्गण उदितशमो नेङ्गते किञ्चित् ॥ ७३ ॥

विध्यण्डेपि व्यतियति शान्तरसास्वादसादितोद्वेगः ।
अम्भोनिधिगम्भीरो धीरमुदास्ते मुदा परं धन्यः ॥ ७४ ॥

उद्वेजयत्वसाधुः साधुस्साधुं प्रपूजयतु ।
एजयतु कोपि चपलः सर्वसमश्शमपरो जयति ॥ ७५ ॥

लिम्पतु चन्दनपङ्कैरङ्गं वास्या विलुम्पतु वा ।
नाशंसति कल्याणं नाकल्याणं तथा शान्तः ॥ ७६ ॥

उपतिष्ठन्तां विषया घनाघना वाथ संप्रतिष्ठन्ताम् ।
उपशान्तस्य किमेतैरन्तरमथवान्तरिक्षस्य ॥ ७७ ॥

तस्य किमीशतया वा ब्रह्मत्वेनाथ वा महेन्द्रतया ।
दैन्यनिदानं तृष्णा दहनज्वालेव यदि पुनश्शान्ता ॥ ७८ ॥

उपदाभिरात्मलोकैरुपतिष्ठन्तां तमवसरप्रेक्षाः ।
ब्रह्माद्याः किममीभिः शान्तिपरैश्वर्यमीयुषो विदुषः ॥ ७९ ॥

ब्रह्मेति न बहु मनुते श्वसूकरादीति विमनुते नापि ।
सममनुपश्यन्नास्ते तुष्टः स्वेनैव केवलं शान्तः ॥ ८० ॥

सब्रह्मकास्सुरा गिरिशिखरगतस्येव भूचराः कृमयः ।
केऽमी भूपापसदाः शान्तिपदे शाश्वतेऽभिषिक्तस्य ॥ ८१ ॥

किं ब्रह्मा किं मशको मर्तव्ये महति कालपरिवर्ते ।
किं मेरुः किमणुर्वा मङ्क्तव्ये सति महार्णवावर्ते ॥ ८२ ॥

अमृतं वास्तु तृणं वा यद्यशितेनैव तेन तृप्येयुः ।
देवाः किं कृमयः किं ज्वलदशनायामये तुल्ये ॥ ८३ ॥

योगाय न चेत्तनुरियमसुलभ एवामनोहतेर्भोगः ।
दोहाय न वाहाय न किमसौ वन्ध्येव पुष्यते करभा ॥ ८४ ॥

भ्रूभङ्गकेलिकलिते वक्त्रावर्ते भ्रमन्ति वनितानाम् ।
बहुतटमविवेकहताः कुलाचला इव तु निश्चला धीराः ॥ ८५ ॥

त्वङ्मांसमस्थिकेशा बीभत्स्यन्ते विभक्तदृष्टानि ।
समवायिषु तेषु कुतो वनिता वनितेति दुर्धियो मोहः ॥ ८६ ॥

स्थानं किमस्य बीजं किं किमुपष्टम्भकं किमन्तर्वा ।
इत्यविमृश्य बहिर्दृक् कान्ता कान्तेति मुह्यति मुधैव ॥ ८७ ॥

अन्वक्षं यदनुक्षणमक्षालितमास्रवन्मलैर्विस्रम् ।
तस्मिञ्जुगुप्सितव्ये मलभाण्डे मानिनीति किं त्वेतत् ॥ ८८ ॥

हरिचन्दनमिति सुरभिलमालेति मनोज्ञवाटीति ।
वनितातनुकेशास्ये दुर्गन्धं पिदधदेव मुह्यति किम् ॥ ८९ ॥

वदनं यदमृतकर इति नयनं यच्चापि नीलनलिनमिति ।
कनकलतेति यदङ्गं तदेव निधने तनोः कथं पश्य ॥ ९० ॥

अमृतावयवशरीरा बाला चान्द्री कलेव निर्गलिता ।
आप्याययत्यपाङ्गैरिति मुह्यति पश्य कस्य को योगः ॥ ९१ ॥

आलम्बितमालिङ्गितमाघ्रातञ्चानुचुम्बितञ्चापि ।
उपभुक्तमङ्गनाङ्गं किमत्र मोहभ्रमादन्यत् ॥ ९२ ॥

कण्डूतिनोदनं वा कामानलवेगसंशमो वापि ।
उभयोरुभयं तुल्यं किमयं स्वयमेव किङ्करः स्त्रीणाम् ॥ ९३ ॥

मेदोबुदमक्ष्युत्पलमस्थिविचारं मृदुस्मितं ज्योत्स्ना ।
लालामधरामृतमिति कविभिर्महयद्भिराहतो लोकः ॥ ९४ ॥

यदपाङ्गलेशसङ्गादङ्गमुपाङ्गं जुगुप्सनीयमपि ।
मङ्गलमिवाङ्गनानां तमनङ्गं ब्रूमहे जगन्मोहम् ॥ ९५ ॥

कालव्यालीदंष्ट्रा क्षुरधारा क्षुद्रराजमैत्री च ।
एकत्रैकत्र वधूरियमथवैकातिरिच्यते सकलात् ॥ ९६ ॥

कुटिलास्सर्वे भावाः कुन्तलजाले कुतः कवेर्निष्ठा ।
कर्कशमन्तःकरणं तर्कय युवतेरुत स्तनग्रन्थी ॥ ९७ ॥

वदितुन्न प्रभवामो वनिता यास्सन्तु तास्सन्तु ।
मूर्ताभिर्मायाभिः मुमुक्षतामस्त्वलन्ताभिः ॥ ९८ ॥

संसृतिनिरयसरण्यां मोहान्तर्दाहसन्धमधमन्या ।
मुक्तिद्वारार्गलया गलनिगलेनालमङ्गनया ॥ ९९ ॥

साहससङ्केतभुवा चपलचापल्यचाटुशिक्षिकया ।
मलमणिमञ्जूषिकया चिरमलमुद्भद्धपाश्ययाङ्गनया ॥ १०० ॥

रागोद्रेचितपूयक्लिन्ने नाडीव्रणे कृमिक्षीणे ।
पुत्रः पुत्र इतीमे लोका बंभ्रमति संभ्रमेण कियत् ॥ १०१ ॥

उपरुन्धन्न कुशलं स्वं पुत्रं मित्रं कलत्रमिति ।
पश्यति किं पाथेयं परलोकप्रस्थितो यदा भवति ॥ १०२ ॥

अभ्यस्यामो विद्यां विषयानुपभुञ्जमहेऽथ शाम्यामः ।
कुर्मो यथाभिलषितं क्रूरो मृत्युस्तु न क्षणं कुरुते ॥ १०३ ॥

वृद्धौ मातापितरौ साध्वी भार्या सुतश्शिशुरकार्यैः ।
अपि भार्या इत्यन्धस्स्वयं पतन्तन्निपातयत्यन्धम् ॥ १०४ ॥

लाभो बहुलायासो लब्धस्याधिर्व्ययेऽथवा नाशे ।
किन्न धनाशा दुःखं भोगापगतं च यत्तदनुतपति ॥ १०५ ॥

सत्यं लभ्ये लब्धे किमपि सुखं तत्र भुक्तनष्टेपि ।
यद्दुखं तदरुन्तुदमामृत्योर्दहति कोटराग्निरिव ॥ १०६ ॥

नार्जनरक्षायासो न व्ययनाशादिशङ्कयाऽऽतङ्कः ।
नित्यसुखैकनिधानं धनमाकिञ्चन्यमन्यदेव सताम् ॥ १०७ ॥

हालाहलवाहिन्या बलवदुदन्यां स शमयितुं घटते ।
किंपाकैरशनायां सुखाय मूढो धनाय यतते यः ॥ १०८ ॥

दारा हृदयविदाराः सुतास्सताश्चैवमसुतराधिकराः ।
धनमपि सन्ततनिधनं पारिव्राज्यं सुखैकसाम्राज्यम् ॥ १०९ ॥

धनवानस्मीति मदः कियतापि धनेन कृच्छ्रलब्धेन ।
तदपाये मृतिमूर्च्छा तदनिच्छैव त्वनिच्छतोऽप्यमृतम् ॥ ११० ॥

विषयपरिग्रहमूला वर्षावधिकापगा इवोत्कूलाः ।
प्रवहन्त्यापन्नद्यो यास्वाशापाशिता विपद्यन्ते ॥ १११ ॥

आमज्ञो जिज्ञासितमुद्राद्यो ग्राहितं मिथोऽवधृतम् ।
सर्वाशासंशान्तिनर्त्ते विनिवर्तते भवावर्तः ॥ ११२ ॥

किं यागैः किमु योगैः किं वा भूमिप्रदक्षिणक्रमणैः ।
हृदि यदि रूढा शान्तिर्यदि वाशा किन्तु तैरेव ॥ ११३॥

धर्माय कुशलमस्तु स्वर्तुमनर्थात्मनो बिभेम्यर्थान् ।
धिक्कामानसुखमयान् अधुना विश्रमितुमस्मि शान्तिपदे ॥ ११४ ॥

ये केऽप्यान्तरबाह्याः सुखहेतोरनुसृताः क्रियायोगाः ।
ताननुजानाम्यधुना विश्रान्तो नियतमेव शान्तिपदे ॥ ११५ ॥

आ द्रुहिणादा च कृमेरक्रमिका कालिकेपि सुखःदुःखे ।
अहो पश्यत मोहं क्षणं प्रसीदति जनो विषीदति च ॥ ११६ ॥

भद्रमभद्रं वा नः कर्म विनिर्मातु कामतो जन्म ।
अश्रान्तं शान्तिपदे विश्रान्तं स्याद्यदि स्वान्तम् ॥ ११७ ॥

दिव्यनदी कुनदी वेत्यार्यावर्तोऽथ कीकटो वेति ।
तावद्विकल्पमोहो यावन्नेहेत पावनीं शान्तिम् ॥ ११८ ॥

पुण्यमिदं तीर्थमदः पुण्यतमश्चेति चञ्चरतु चञ्चाः ।
प्रायो देशातिथयः शान्तस्यात्मैव तीर्थममृतमयम् ॥ ११९ ॥

किं पुष्करं प्रयागः किं वा गङ्गाब्धिसंगमो वापि ।
बहिरनु विमृशत्यंहो नात्मानं तीर्थमखिलतापकरम् ॥ १२० ॥

कर्तव्यमकर्तव्यं प्रतिकर्तव्यमिति विभ्रमविकल्पैः ।
अलमलमायासफलैरन्तर्विश्रान्तिमेमि शान्तिपदे ॥ १२१ ॥

साधितमनया तन्वा भवमरुपथचारविश्रमस्थानम् ।
अलमलममुया भूयः कृतघ्नतेयं तु मर्षणीया नः ॥ १२२ ॥

आश्वासितमखिलेन्द्रियमानन्दितमन्तरङ्गमतरङ्गम् ।
बहुन्ना जीवकला किं ब्रूमः शमरसामृतास्वादम् ॥ १२३ ॥

उपशान्तास्सन्तापाः शारीरा मानसाश्च ये चान्ये ।
कैरपि सुकृतैरधुना शान्तिसुखाब्धौ विहरति स्वान्तम् ॥
(विहरति हृदयं शमामृताम्बुनिधौ) ॥ १२४ ॥

येषां पक्षविपक्षौ न स्तो नापि प्रियाप्रिये महताम् ।
नापि च हर्षविषादौ ते शान्तास्तान्नमस्यामः ॥ १२५ ॥

ऊहासहमुपरिप्लवमुपचितसन्देहमुन्मिषन्मोहम् ।
च्युतपूर्वपरक्रमकं ज्ञानं येषामिमेपि हुं गुरवः ॥ १२६ ॥

अव्याहतं व्यवहितेप्यतिसूक्ष्मेऽपि स्फुटोत्तरस्फुरणम् ।
अक्रामिकसकलविषयं ज्ञानं महतां निरञ्जनं जयति ॥ १२७ ॥

इति शास्त्रसुधाम्बुधिं मथित्वा प्रतिलब्धं प्रशमामृतं निपीय ।
अवधूतभवामयाधिबाधा विबुधा निर्वृणुताजरामराश्च ॥ १२८ ॥

वासुदेवेन्द्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्देन यमिना प्रणीतं प्रशमामृतम् ॥

कृष्णानन्दकृतिषु प्रशमामृतं संपूर्णम् ॥

॥ मनःसम्बोधनम् ॥

वामार्धेन प्रणयकुपितं दक्षिणेनानुनेतुं
सान्त्वानत्यञ्जलिषु घटते यत्परं भावभेदैः ।
भावाश्लेषप्रमदसुभगंभावुकं भावुकं तत्
भूयाद्द्वन्द्वं भुवनपितरौ भूयसे श्रेयसे नः ॥ १ ॥

चेतश्चेतस्तत इति परिभ्रम्य किं खिद्यसे त्वं
लब्धालब्धैरसुलभसुखैरर्थकामैरनर्थैः ।
विश्राम्येत क्षणमपि सखे खेदसंशान्तये ते
वक्ष्याम्येकं गलितनिखिलापायमेषोऽस्म्युपायम् ॥ २ ॥

पश्येदानीमखिलजगतीमन्तकस्यान्तरस्था-
माशाभङ्गं परिमृश भृशं भूयसाप्युद्यमेन ।
लब्धेनापि स्मर परिणतौ भोगवैरस्यमन्तः
स्वेनैव त्वं शमसुखरसं ज्ञास्यसे शान्तवाहि ॥ ३ ॥

आयासेनाकलय कियता तारकाधिष्ण्यमाप्य
पश्यस्यासामपि च पतनं त्वं मधूकावपातम् ।
कालेनेदं किल कवलितं जीर्यति ब्राह्ममण्डं
विस्रम्भस्ते वपुषि क इवायं पयोबुद्बुदे वा ॥ ४ ॥

एकद्वा न ह्यवनिपतयः कालसाद्भूतभावा
न द्वित्रास्ते हृदयसुहृदो नाममात्रावशेषाः ।
षट्सप्ता न प्रतिभयमहाव्यापदस्तेनुभूताः
सप्ताष्टानप्यनुदिनमिदं चिन्तयान्तर्निमेषान् ॥ ५ ॥

निर्वाणाय स्मरहरपदं संस्मर प्राणवृत्त्यै
चेतश्चिन्तां चिरमनुगतामुच्चकैरुज्जहाहि ।

शाल्हूरस्य प्रकटतमसो योऽपि पाषाणगर्भे
धत्ते वृत्तिं स किमिह न ते कल्पयिष्यत्यधीशः ॥ ६ ॥

हन्ताश्रान्तं भवमरुपथेऽलभ्यविश्रान्तिभूमा-
वामानुष्यादसुखबहुलादा च सत्यादवीचेः ।
यातायातश्रममनुभवन् यातना यातयामं
सर्वो लोकः किमिति न मनो दृश्यते ते कदापि ॥ ७ ॥

आरम्भास्ते कति न विफला निष्ठितौ भूतपूर्वाः
संरम्भेण द्रविणमरुवाः सानुतर्षं पिपासोः ।
प्रत्याशाया विरम विषयोल्लापनाया न यावत्
प्रत्यासीदत्यपि जडमनः सर्वकृन्तः कृतान्तः ॥ ८ ॥

यावत्तृष्णा भवति विषये यत्तदेवेह दुःखं
लब्धे तस्मिन्नुपरमति सा यत्क्षणं तत्सुखं ते ।
तामुत्पत्तिं हृदय निपुणं रुन्धि नित्यं सुखाप्त्यै
पङ्कालेपं परमनुकलं क्षालने मा यतिष्ठाः ॥ ९ ॥

दुःखं जन्तोरुपनमति यन्निष्प्रतीकारभोगं
तत्प्रत्यक्षं तव च नियतं नन्वनायस्यतोऽपि ।
तत्सामान्यं विषयजसुखे पश्यतावश्यभाव्यं
शान्तेनान्तर्हृदय भवता मत्प्रियं कुर्वता वा ॥ १० ॥

स्वच्छन्देन प्रणयविषये माक्षतन्त्रं यथेदं
बाह्याबाह्यं कलयसि पदं देहलीदीपभङ्ग्या ।
बाह्याभ्यन्तरसुखतुलनया तत्र मध्यस्थवृत्त्या
वैरस्यं त्वं विषयजसुखे वेत्स्यसि स्वात्मनैव ॥ ११ ॥

स्वाधीन्माथिन्युपवदति यत्तत्प्रतीकारनिष्ठा-
मातिष्ठेथा हृदय दुरितायाससाहाच्चिराय ।

तस्यैतस्मिन्वपुषि सकलानर्थहेतौ कथं ते
सर्वोत्साहप्रतिकृतपदे सर्वथैवानुबन्धः ॥ १२ ॥

एतत्कार्यं कृतमिदमयं कार्यशेषो ममेति
व्यासङ्गेन स्मरसि हृदय श्रेयसो न प्रमादात् ।
किं कर्तासि प्रियमविदति ह्यस्तनं श्वस्तनं वा
दिष्टादिष्टेन्द्रियमतिवधे जन्मनि त्वं तिरश्चाम् ॥ १३ ॥

श्वोभावि श्वः कुशलमिति मा लालसादर्शदृश्यै-
राशामोदैरफलय तृषामानुषं सानुषङ्गम् ।
ईदृक्क्षेमक्षममिह कदा भावि ते जन्म चेतः
श्रेयोमार्गानभिमुखमहं त्वानुयातो हतोस्मि ॥ १४ ॥

जन्मावश्यं तव शिवपदध्यानहीनस्य यस्मिन्
भोक्तासे त्वं हृदय विवशं दुर्दशामेकमेव ।
तामेवास्मिन्ननुभव तपोभाविताभीशवृत्त्या
भावाक्तं परशिवपदं लप्स्यसे तावतैव ॥ १५ ॥

रागस्यन्दाहितमधुरिमा मानसार्थस्त्वयाक्षो
जीर्णोपानत्त्वगिव च शुना लौल्यलालारसार्द्रा ।
स्वादुङ्कारं स्वरसविरसो भुज्यते रज्यतैव
स्वामप्राज्ञं क इव महते मासृणीयेत लोकः ॥ १६ ॥

प्रासादाग्रं प्रमदवनिका पद्मिनी केलिशैलः
सोऽहं सम्राडिति किमयथाफल्गुसङ्कल्पनेन ।
सर्वेशोऽस्मीत्यवितथमये चित्त सङ्कल्पयेथाः
पाथःप्रायं पिबति मनसा कः पयः पातुकामः ॥ १७ ॥

अक्षैरर्थानुपहरदिव स्वैन सङ्कल्पितान्वा
माक्षुल्लोभं हृदय समनस्कारमभ्यश्नुषे तान् ।

मोघात्मार्थो मुहुरनुविदन्नेव ते निष्ठितोऽहं
ग्रासं ग्रासं परमभिलषन्नश्नतो वा बिडालम् ॥ १८ ॥

संख्यातीतं गतरुजमपि स्यात्परायुः सहस्रं
सम्पद्येरन् सरसिरुहभूसम्पदोऽतीतसंख्याः ।
सम्पर्याप्तिं किमु हृदय ते लुब्धलोलुभ्यमानं
यत्त्वं मोहं प्रतिपदमये गाहसे पङ्कसिन्धुम् ॥ १९ ॥

तत्तादृक्षप्रथितमहिमश्रीजुषामप्यमीषां
लोकेशानामपि शतमखह्लादवैरोचनीनाम् ।
द्रागज्ञातायतिगतिदशामापदं पश्यतोपि
प्रत्याशायामनुचितमिहाहैतुकं कौतुकं ते ॥ २० ॥

आयुर्वायुप्लवनविवलत्पल्लवाग्रोदबिन्दुः
सम्पत्तिश्च प्रतिकलगलत्कुण्डिकावारिपूरः ।
संक्षीयन्ते तदपि नृपतेरन्तरद्वारवेद्यां
पश्योन्मोहं हृदय कुजना दुर्धनाराधनाय ॥ २१ ॥

पश्यन्तोपि प्रतिपदभवामापदं सम्पदुत्थां
पुत्रक्षेत्रप्रणयनिचयव्याधयस्साधयामः ।
नानारूपैरभिनयपदैर्येन नानव्यमानाः
कुर्मस्तस्मै वयमिह नमश्चेतसे निर्घृणाय ॥ २२ ॥

निद्रातन्द्रीक्लमपरिभवप्राभृतप्रत्यवेक्षा-
निर्वैलक्ष्ये विषमविषयक्ष्वेलनैकान्तलक्ष्ये ।
यातायातश्रमफलगतिव्यग्रविग्रश्वशीले
सासौ सासौ भवति सति का या मनःक्षेमकाङ्क्षा ॥ २३ ॥

अद्याशेपि श्वगतिगमिनस्ते दरिद्राणवृत्तेः
चेतश्चिन्ताहृतकणभुजः क्वाधिराज्यं तदैन्द्रम् ।
नित्यातङ्कप्रकटमहितोत्थानदुःस्थासिकाना-
मिन्द्रादीनामथ यदि पदं लब्धमप्यस्ति किं ते ॥ २४ ॥

येभ्यो नाम स्पृहयसि मनःसारसम्पत्तिविद्या-
वीर्यैश्वर्याद्यतिशयगुणैरात्मना तैर्बुभूषु ।
तानेवानुस्मरसि न कथामात्रशेषानशेषान्
येषामीषामियमपि कथा लुप्यते कल्पवेगात् ॥ २५ ॥

तान्यस्थीनि क्षतजमपि तत्तानि मांसानि सा त्वक्
तेऽमी केशाः पृथगिति मनो यानि बीभत्ससे त्वम् ।
अन्तर्बाह्याशुचिघनगडुग्रन्थिलां सालभञ्जीं
यन्त्रालोलामभिलषसि यामङ्गना कामिनीति ॥ २६ ॥

शिल्पं कल्पक्षयविनिमयप्रत्ययप्रत्ययेयं
प्रादुष्कुर्वन्त्यसुखसुखयोश्चित्तनृत्यस्य विद्याः ।
कामादीनामफलनटनाडम्बरालम्बयष्टि-
स्तस्या मुष्टिन्धयनयकलाकौशलं तत्त्वविद्या ॥ २७ ॥

हित्वाविद्यामयमयमहन्तन्ममेति ग्रहं त्वं
मोहादीनां पदमधिशिरो न्यस्य वामं रिपूणाम् ।
आकिञ्चन्यामृतरसपिबः शान्तिसौभाग्यलक्ष्मीं
श्रेयःसौधे रमय हृदयानन्दसन्दोहदोग्ध्रीम् ॥ २८ ॥

अवधिनियतकालग्रस्तविध्यण्डगर्भे विषयविवशवृत्ति नन्दति स्वेन लोकः ।
कुपितकपिकपोलोदुम्बरान्तःप्रमाद्यन्मशककुलदशा सा चित्त ते चिन्तनीया ॥ २९ ॥

किमिह बहुभिरुक्तैः स्यादिदं मे न तत्स्यादिति विषमविमोहापोहमूहोपपत्त्या ।
अपरिमितमयत्नप्राप्यमाबाधहीनं शमसुखमनुभोक्तुं युङ्क्ष्व निःश्रेयसाय ॥ ३० ॥

इति परममृतं यच्चित्तसम्बोधनाख्यं रसयति रसनीयं सारनिःसारविज्ञैः ।
विषमविषयवाञ्छामाशु निर्धूय शुद्ध्या स नियतमुपशाम्यन्नेति निर्वाणयोगम् ॥ ३१ ॥

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
कृष्णानन्देन मुनिना मनःसम्बोधनं कृतम् ॥